'मास्टर' मणिमालायाः ८३ संख्यको मणिः (कर्मकाण्डविभागे २१)

❀ श्रीः ❀

पुत्तलविधानपद्धतिः

[हिन्दीटीकासहिता]

प्रणेता —

स्व० पं० श्रीवायुनन्दनमिश्रः, कर्मकाण्डी

प्रकाशकः—

मास्टर खेलाड़ीलाल ऐण्ड सन्स,

संस्कृत बुकडिपो,

कचौड़ीगली, बनारस सिटी।

मूल्यम् ।=)

सङ्गणकसंस्करणं दासाभासेन हरिपार्षददासेन कृतम्

'मास्टर' मणिमालायाः ८३ संख्यको मणिः (कर्मकाण्डविभागे २३)

❀ श्रीः ❀

पुत्तलविधानपद्धतिः ।

काशीस्थ-मध्यमेश्वर-वास्तव्येन कर्मकाण्डविशारदेन

प्रसिद्धा ग्निहोत्रिणा

स्व० पण्डितश्रीवायुनन्दनमिश्रेण

विरचितया हिन्दीटीकया

संवलिता ।

—:❀:—

सा च

काशीस्थ-'संस्कृत बुकडिपो'-इत्यस्याऽधिपैः

मास्टर खेलाड़ीलाल ऐण्ड सन्स इत्येतैः

स्वीये 'मास्टर प्रिण्टिङ्ग वर्क्स' नाम्नि मुद्रणागारे

मुद्रयित्वा प्रकाशिता ।

सङ्गणकसंस्करणं दासाभासेन हरिपार्षददासेन कृतम्

प्रकाशकः—
जे० एन० यादव प्रोप्राइटर,
मास्टर खेलाड़ीलाल ऐण्ड सन्स,
संस्कृत बुकडिपो,
कचौड़ीगली, बनारस सिटी ।

[अस्याः पुनर्मुद्रणाद्यधिकाराः प्रकाशकेन स्वायत्तीकृताः]

मुद्रकः—
श्रीमन्नालाल अभिमन्युः, एम० ए०
मास्टर प्रिण्टिङ्ग वर्क्स,
बुलानाला, बनारस सिटी ।

* श्रीगणेशाय नमः *

अथ पुत्तलविधानपद्धतिः

देहाभावे प्रकुर्वीत पुत्तलं विधिवन्नरः ।
कृष्णाजिनं समास्तीर्य्य कुशैः कृत्वा नराकृतिम् ॥ १ ॥

देह के अभाव में विधि पूर्वक पुत्तल बनावै--जिसकी विधि लिखते हैं:—काले मृगा के चाम को बिछाकर उसके ऊपर कुशा का मनुष्य बनावै ॥ १ ॥

शतत्रयैः षष्टियुतैर्वृन्तैः प्रोक्तोऽस्थिसञ्चयः ।
विन्यसेत्तानि वृन्तानि अङ्गेष्वेवं पृथक् पृथक् ॥ २ ॥

जिसपर तीन सौ साठ पलास के पत्ते को अस्थिसञ्चय के निमित्त अङ्ग में अलग-अलग लगावै ॥ २ ॥

तेषां पालाशवृन्तानां विभागं शृणु काश्यप !
चत्वारिंशच्छिरोभागे, ग्रीवायां दश विन्यसेत् ॥ ३ ॥

उस पलास के पत्तों को अङ्गों में विभाग करके लगाते हैं। ४० पत्ता सिर में लगावै और दस पत्ता गले में लगावै ॥ ३ ॥

बाहुद्वये शतं दद्याद्विंशतिं हृदये न्यसेत् ।
उदरे विंशतिं दद्यात् कटौ दद्याच्च विंशतिम् ॥ ४ ॥

दोनों बाँहू में पचास-पचास लगावै, बीस छाती (हृदय) में, बीस पेट में, दश-दश दोनों तरफ कमर में लगावै ॥ ४ ॥

दद्याच्चतुष्टयं शिश्ने, षड् दद्याद्वृषणद्वये ।
ऊरुद्वये शतं दद्यात् त्रिंशतं जङ्घयोर्न्यसेत् ॥ ५ ॥

चार पत्ता लिङ्ग में, तीन-तीन पत्ता दोनों वृषण में (अंड-कोष में) लगावै । पचास-पचास दोनों ऊरु में (याने कमर के नीचे, घुटनों के ऊपर) पन्द्रह-पन्द्रह दोनों जङ्घा में लगावे ॥५॥

दश पादाङ्गुलीदेशे एवमस्थीनि विन्यसेत् ।
नालिकेरं शिरोभागे तुम्बं दद्याच्च तालुके ॥ ६ ॥

(जानू के नीचे) दश पत्ता दोनों पैर की अङ्गुली में लगावे और शिर के स्थान में १ नारियल देवे, और तालू के स्थान में १ तूंबी देवे ॥ ६ ॥

पञ्चरत्नं मुखे दद्याज्जिह्वायां कदलीफलम् ।
अन्त्रेषु नालिकाशाकं बालुकं घ्राणके न्यसेत् ॥ ७ ॥

पञ्चरत्न मुख में देवे और जिह्वा के स्थान में केला देवे । नाडी के स्थान में करेमू की डण्डी व घ्राण के स्थान में बालू देवे ॥ ७ ॥

वसायां मृत्तिकां दद्याद् गोमूत्रं मूत्रके न्यसेत् ।
विन्यसेद्गन्धकं धातौ हरितालं मनःशिलाम् ॥ ८ ॥

और हथिनी के स्थान की मिट्टी और गोमूत्र मूत्र के स्थान

में देवे और धातु के स्थान में गन्धक, हरताल, मैनसिल देवे॥

पुरीषे पित्तलं दद्याद्दद्याद्रेतसि पारदम्।
अधरे विद्रुमं दद्यात्तिलकल्कं च सन्धिषु॥ ९॥

विष्ठा के स्थान में पित्तल (पीतल), रेत के स्थान में पारा देवे, नीचे ऊपर के ओष्ठ के स्थान में विद्रुम (मूंगा) देवे, सन्धियों में तिल्ली की खरी देवे॥ ९॥

यवपिष्टं न्यसेन्मांसे शोणिते मधु विन्यसेत्।
दद्याद्वटजटां केशे न्यसेत्त्वचि मृगत्वचम्॥१०॥

मांस के स्थान में जौ का आटा देवे, खून के स्थान में शहद देवे, बाल के स्थान में बड़ की जटा देवे, चाम के स्थान में मृगा का चाम देवे॥१०॥

कर्णयोस्तालपत्रं च नासायां शतपत्रकम्।
कूर्चे च सौकराः केशा ऊर्णां च गुह्यवक्षसोः॥११॥

दोनों कान के स्थान में तालपत्र (तेजपत्ता), नाक के स्थान में कमल देवे, दाढ़ी व भौं पलक व छाती व गुदा इत्यादि में सूअर के बाल देवे॥११॥

सुवर्णं हृदये दद्याद् गुञ्जे च स्तनयोर्न्यसेत्।
सिन्दूरं नेत्रकोणे च चक्षुषोर्द्वे कपर्दिके॥१२॥

हृदय में सोना देवे, दोनों छाती पर घुंघुची देवे और नेत्र के कोनों में सिन्दूर देवे, दोनों नेत्र के स्थान में २ कौड़ी देवे।

ऋद्धि-वृद्धी भुजद्वन्द्वे कमलं नाभिमण्डले ।
घृतं नाभ्यां प्रदेयं स्याद्वृन्ताकौ वृषणद्वये ॥१३॥

दोनों भुजाओं पर ऋद्धि-वृद्धि (नामक औषधि), नाभि में कमल व घृत देवे और दोनों वृषण में वृन्ताक (भंटा) देवे ॥१३॥

शिश्ने च गर्ज्जरं दद्यादुदरे च त्रपु स्मृतम् ।
परिधानं पट्टवस्त्रं कुङ्कुमैर्मूर्ध्नि लेपनम् ॥१४॥

शिश्न के स्थान में गाजर देवे, उदर में रांगा या शीशा देवे । रेशमी वस्त्र पहिरावे चन्दन केसर लगावे ॥१४॥

सर्वौषधियुतं कृत्वा काश्यप ! प्रेतमुत्तमम् ।
कर्पूराऽगुरुधूपैश्च शुभ्रैः पुष्पैश्च पूजयेत् ॥१५॥

और सर्वौषधी लेपन करने पर उत्तम प्रेत होता है । उसको कपूर, अगर, धूप, दीप, सुन्दर फूल से पूजन करै ॥१५॥

साग्निकेनाऽथ विधिना यज्ञपात्राणि विन्यसेत् ।
शिरो मे श्रीः पुनात्वेवमिमं मे वरुणेति च ॥१६॥

यह निरग्निक का व्यवहार कहा है । अब साग्निक के लिए विशेष कहते हैं—साग्निक के अङ्गों पर यज्ञपात्र सब शिरों में 'श्रीः' 'पुनातु' और 'इमं मे वरुण' ३ मन्त्रों से ॥१६॥

पवित्रं पुत्तलं कुर्याच्छालग्रामशिलोदकैः ।
घृतदीपं च कुर्वीत पुत्तलस्य हृदि न्यसेत् ॥१७॥

पुत्तला को शालग्राम शिला के जल से पवित्र करै, घी का दीया जलाकर पुत्तल के हृदय पर रखै ॥१७॥

महादानानि दत्त्वाऽष्टौ तिलपात्रादिकं तथा।
ततो वैतरणी देया सर्वाभरणभूषिता ॥१८॥

बाद आठ महादान आदि देवे। उसे कहते है, ताँबे के पात्र में तिल्ली भर के, सोना उसपर रखकर, ब्राह्मण को देवे। उसके बाद सम्पूर्ण आभूषण के सहित वैतरणी गौ देवे ॥१८॥

कर्तव्यं मामकं श्राद्धं प्रेतमोक्षप्रदं तथा।
ॐविष्णुरिति संस्मृत्य पुत्तलं कल्पयेन्मृतम् ॥१९॥

अन्न इत्यादि देवे, प्रेत के मोक्ष के वास्ते विष्णु का स्मरण करते हुवे, अमृतरूप कल्पना करना ॥१९॥

ततो दाहादिकं कुर्यात् सूतकं च दिनत्रयम्।
यस्य कलेवरं पुंसो ह्यग्नौ नैव तु दह्यते ॥२०॥

उसके बाद दाह आदि काम करै। तीन दिन का सूतक मानै। जिस पुरुष का शरीर बदलने पर दाह नहीं होता–॥२०॥

तस्य पुत्तलकं कार्य्यं सूतकं च दिनत्रयम्।
यस्य पुत्तलकं कुर्यान्न कुर्यात्तस्य सञ्चयम् ॥२१॥

उसके लिए पुतला करना, तीन दिन का सूतक मानना और जिसका पुत्तल करे उसका अस्थिसञ्चय न करे ॥२१॥

दिने दिने च पिण्डानि न कुर्वन्ति विपश्चितः ।
त्रिरात्राऽऽशौचकं कुर्यात् पिण्डांस्त्रीन् प्रथमेऽहनि॥२२॥

रोज रोज पिण्ड न करै, तीन दिन का आशौच करे जिसमें तीन पिण्डा पहिले दिन, ॥२२॥

चतुरस्तु द्वितीयेऽह्नि तृतीये त्रयमेव च ।
पृथक् शरावयोर्दद्यादेकाहे दुग्धमम्बु च ॥२३॥

चार पिण्डा दूसरे दिन, फिर तीन पिण्डा तीसरे दिन अलग २ एक कसोरा में दूध, एक में जल देवे ॥२३॥

वर्षान्तं च विधिं कुर्य्याद्यथाविधि सुतस्ततः ।
मोक्षमाप्नोति स प्रेतः कर्तुः स्याच्चाऽक्षयं फलम् ॥२४॥

पुत्र यदि पिण्ड इत्यादि बराबर वर्ष भर विधि पूर्वक करे तो प्रेत को मोक्ष प्राप्त होता है और कर्ता को अक्षय फल होता है॥२४॥

अथ पद्धतिः ।

अब प्रयोग कहते हैं—

आचम्य प्राणानायम्य सव्यं पूर्वाभिमुख उपविश्य ॐ विष्णुर्विष्णुर्विष्णुरिति पठित्वा ॐ तत्सदद्येत्यादि सङ्कीर्त्य अपसव्यम् । अद्यामुक-गोत्रस्याऽदग्धप्रेतस्य प्रेतत्वोत्तारणार्थमसद्गतिविना-

शनार्थं सद्गतिस्वर्गलोकप्राप्त्यर्थम् मरणावसरे षट्-त्रिंशद्दोषपरिहारार्थम् ऊर्ध्वोच्छिष्टाधरोच्छिष्टशय्या-मरणमलमूत्रपुरीषकृतपातकपरिहारार्थं मरणसमये हरिनामोच्चारणवर्जितवैकल्यहृदये म्लेच्छभाषादि-वक्तव्यमधर्मचिन्तनं दानरहितं मार्जार-चाण्डाल-शूद्रादिस्पर्श-रजस्वलास्पर्श-मरणकालविधिवर्जिताऽऽ-जन्ममरणान्तकृतगुरुलघुपापानां विशोधनार्थमातुराव-स्थायामभक्ष्यभक्षणाऽपेयपानाऽस्पृश्यस्पर्शाऽनिरीक्ष्य-निरीक्षणाऽगम्यागमनाऽसंस्कृतभूमिशयनदोषपरिहा-रार्थं परज्ञातीयस्पर्शदोषपरिहारार्थं परदेशपरगृह-दक्षिणायने पञ्चकमध्ये मरणदोषपरिहारार्थं गङ्गादि-महानदीदेवब्राह्मणगुर्वसान्निध्यमरणदोषपरिहारार्थम् (ततः सव्यम्) विष्णोः प्रीत्यर्थमदग्धदेहोत्पादनार्थं पुत्तलविधानप्रारम्भनिमित्तं विष्णोः षोडशोपचारैः पूजनमहं करिष्ये ॥

आचमन प्राणायाम करके सव्य से पूर्वमुँह बैठे, सङ्कल्प पढ़े ।

अथ पूजनारम्भः ।

बाद 'सहस्र शीर्षा' १६ मन्त्र से विष्णु पूजन करै ।

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिꣳ सर्व्वतः स्पृत्वा त्यतिष्ठद्दशांगुलम् ॥

इत्यावाहनम् ॥ १ ॥

पुरुष ऽएवेदꣳ सर्वं यद्भूतं यच्च भाव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥

इत्यासनम् ॥ २ ॥

एतावानस्य महिमातो ज्यायाँश्च पूरुषः ।
पादोस्य विश्वा भूतानि त्रिपादस्यामृतन्दिवि ॥

इति पाद्यम् ॥ ३ ॥

त्रिपादूर्ध्व ऽउदैत्पुरुषः पादोऽस्येहाभवत्पुनः ।
ततो विष्वङ् व्यक्रामत्साशनानशने ऽअभि ॥

इत्यर्घम् ॥ ४ ॥

ततो विराडजायत विराजो ऽअधि पूरुषः ।
स जातो ऽअत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥

इत्याचमनम् ॥ ५ ॥

तस्माद्यज्ञात्सर्व्वहुतः सम्भृतं पृषदाज्यम् ।

प॒शूँस्ताँश्चक्रे वाय॒व्या॑नार॒ण्या ग्रा॒म्याश्च॒ ये ॥

इति स्नानम् ॥ ६ ॥

तस्मा॑द्य॒ज्ञात्स॑र्व॒हुत॒ ऽऋच॒ः सामा॑नि जज्ञिरे ।
छन्दा॑ᳮसि जज्ञिरे॒ तस्मा॒द्यजु॒स्तस्मा॑दजायत ॥

इति वस्त्रम् ॥ ७ ॥

तस्मा॒दश्वा॑ ऽअजायन्त॒ ये के चो॑भ॒याद॑तः ।
गावो॑ ह जज्ञिरे॒ तस्मा॒त्तस्मा॑ज्जा॒ता ऽअ॑जा॒वय॑ः ॥

इति यज्ञोपवीतम् ॥ ८ ॥

तँ य॒ज्ञम्ब॒र्हिषि॒ प्रौक्ष॒न्न्पुरु॑षं जा॒तम॑ग्र॒तः ।
तेन॑ दे॒वा ऽअ॑यजन्त सा॒ध्या ऽऋष॑यश्च॒ ये ॥

इति गन्धम् ॥ ९ ॥

यत्पुरु॑षं॒ व्यद॑धुः कति॒धा व्य॑कल्पयन् ।
मुख॒ङ्किम॑स्यासी॒त्किम्बा॒हू किमू॒रू पादा॑ ऽउच्येते ॥

इति पुष्पम् ॥ १० ॥

ब्रा॒ह्म॒णो॑ऽस्य॒ मुख॑मासीद्बा॒हू रा॑ज॒न्य॒ः कृ॒तः ।
ऊ॒रू तद॑स्य॒ यद्वैश्य॑ः प॒द्भ्याᳯ शू॒द्रो ऽअ॑जायत ॥

इति धूपम् ॥ ११ ॥

च॒न्द्रमा॒ मन॑सो जा॒तश्चक्षो॒ः सूर्यो॑ ऽअजायत ।

श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥

इति दीपम् ॥१२॥

नाभ्या ऽआसीदन्तरिक्षᳪशीर्ष्णो द्यौः समवर्तत ।

पद्भ्याम्भूमिर्दिशः श्रोत्रात्तथा लोका २ ऽअकल्पयन् ॥

इति नैवेद्यम् ॥१३॥

यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।

व्वसन्तोऽस्यासीदाज्यं ग्रीष्म ऽइध्मः शरद्धविः ॥

इति ताम्बूलं पूंगीफलं दक्षिणा च ॥१४॥

सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः ।

देवा यद्यज्ञन्तन्वाना ऽअबध्नन्पुरुषम्पशुम् ॥

इति प्रदक्षिणा ॥१५॥

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ॥ ते ह नाकम्महिमानः सचन्त यत्र पूर्वे ॥ साध्याः सन्ति देवाः ॥ इति पुष्पांजलिम् ॥१६॥

'सहस्रशीर्षे'ति प्रथमावर्तषोडशोपचारपूजनकृतस्य विधेः सर्वं परिपूर्णत्वमस्तु चरणामृतं पीत्वा मंत्रपाठः—

अकालमृत्युहरणं सर्वव्याधिविनाशनम् ॥

विष्णोः पादोदकं पीत्वा शिरसा धारयाम्यहम् ॥ १ ॥
सर्वं पापं क्षयं याति पीत्वा पादोदकं हरेः ।
असञ्चितानि पापानि सञ्चितानि बहून्यपि ॥
सर्वाणि विलयं यान्ति पीत्वा पादोदकं हरेः ॥ २ ॥
अनेन विष्णोः षोडशोपचारकृतेन पूजनेन मच्छरीरे सर्वपापक्षयोऽस्तु ॥

ततः भूमौ कुश-तिलानास्तीर्य्य मृगचर्म प्रस्तारयेत । ॐ प्रतद्विष्णुरिति मन्त्रेण—

उसके बाद कुश तिल जमीन पर बिछा कर, मृग का चाम 'प्रतद्विष्णुः' इस मन्त्र से बिछावे ।

ॐ प्र तद्विष्णुः स्तवते वीर्य्येण मृगो न भीमः कुचरो गिरिष्ठाः । यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ॥ य० अ० ५, मं. २०

इति मंत्रेण पुत्तलं विधाय तन्मध्ये षष्ट्यधिकशतत्रयं वृन्तानि धारयेत्, पट्टसूत्रेण वेष्टयेत् । तेषां विभागः ।

और इसी मन्त्र से कुश का पुतला भी बनावे उसके मध्य में ३६० पत्ता पलास का लगावै । रेशमी सूत या ऊन के सूत से वेष्टन (बाँधै) करे । पलाश के पत्ते का विभाग करते हैं;

चत्वारिंशच्छिरोभागे—

'सहस्रशीर्षा' इस मन्त्र से ४० शिर के भाग में,

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ॥ स भूमिᳬं सर्वतः स्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ य. अ. ३१ मं० १ ॥ इति मंत्रेण ॥

ग्रीवायां दस विन्यसेत्—

'नमोऽस्तु नीलग्रीवाय' इस मन्त्र से १० ग्रीवा में लगावै

ॐ नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ॥ अथो ये ऽअस्य सत्वानोऽहं तेभ्योऽकरन्नमः ॥ य. अ. १६, मं. ८ ॥ इति मंत्रेण ॥

बाहुद्वये शतं दद्यात्—

'नमस्त आयुधाया०' इस मन्त्र से पचास पचास दोनों बाहु में लगावे।

ॐ नमस्त आयुधायानातताय धृष्णवे ॥ उभाभ्यामुत ते नमो बाहुभ्यान्तव धन्वने ॥ य. अ. १६ मं. १४ ॥ इति मन्त्रेण ॥

त्रिंशतिं हृदये न्यसेत्—

'नमो वः किरिकेभ्यो' इस मन्त्र से २० हृदय में लगावे।

ॐ नमो वः किरिकेभ्यो देवानाᳬं हृदयेभ्यो

नमो व्विचिन्न्वत्केभ्यो नमो व्विक्षिणत्केभ्यो नमऽआनिहतेभ्यः ॥ य. अ. १६ मं. ४६ ॥ नमः पूर्णायेत्यस्योत्तरार्द्धरूपः। इति मन्त्रेण ॥

उदरे विंशतिं दद्यात्—

'ब्रह्मयज्ञानं' इस मन्त्र से २० पेट में लगावै।

ॐ ब्रह्म यज्ञानम्प्रथमम्पुरस्ताद्वि सीमतः सुरुचो व्वेन ऽआवः ॥ स बुध्न्या ऽउपमा अस्य व्विष्ठाः सतश्च योनिमसतश्च व्विवः ॥ य. अ. १३ मं. ३ ॥ इति मन्त्रेण ॥

कटौ दद्याच्च विंशतिम्—

'श्रीश्च ते' इस मन्त्र से २० दोनों तरफ कमर में लगावै।

ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ॥ इष्णन्निषाणामुम्म ऽइषाण सर्व्वलोकम्म ऽइषाण ॥ य. अ. ३१, मं. २२ ॥ इति मन्त्रेण ॥

दद्याच्चतुष्टयं शिश्ने—

'ईशावास्य' इस मन्त्र से ४ लिङ्ग में लगावे।

ॐ ईशा वास्यमिदꣳ सर्व्वं यत्किञ्च जगत्याम्

जगंत् ॥ तेन त्यक्तेनं भुञ्जीथा मा गृधः कस्यंस्विद्धनंम् ॥ य. अ. ४०, मं. १ ॥ इति मन्त्रेण ॥

षड् दद्याद्वृषणद्वये—

'त्र्यम्बकं यजामहे' इस मन्त्र से ६ दोनों वृषण में लगावे।

ॐ त्र्यंम्म्बकँ य्यजामहे सुगन्धिम्पुंष्टिवर्द्धनम् ॥ उर्व्वारुकमिंव बन्धंनान्मृत्योर्म्मुक्षीय माऽमृतात् ॥ य. अ. ३ मं. ६० ॥ इति मन्त्रेण ॥

ऊरुद्वये शतं दद्यात्—

'इमा रुद्राय' इस मन्त्र से दोनों ऊरु में पचास पचास, लगावे।

ॐ इमा रुद्रायं तवसें कपर्द्दिनें क्षयद्वीराय् प्प्रभंरामहे मतीः ॥ यथा शमंसद्द्विपदे चतुंष्पदे विश्वंम्पुष्टङ्ग्रामें ऽअस्मिन्नंनातुरम् ॥ य. अ. १६, मं ४८ ॥ इति मंत्रेण ॥

त्रिंशच्च जंघयोर्न्यसेत्—

'इदं विष्णुः' इस मन्त्र से ३० दोनों जंघा में लगावे।

ॐ इदं विष्णुर्व्विचंक्रमे त्रेधा निदंधे पदम् ॥ समूंढमस्य पाॐसुरे स्वाहा ॥ य० अ० ५ मं० १५ ॥ इति मन्त्रेण ॥

दश पादाङ्गुलीदेशे—

'दिवो वा' इस मन्त्र से दोनों पैर के दशो अङ्गुली में १० लगावे ।

द्विवो वा विष्ण ऽउत वा पृथिव्या मह्वो वा व्विष्ण ऽउरोरन्तरिक्षात् ॥ उभा हि हस्ता व्वसुना पृणस्वा प्प्रयच्छ दक्षिणादोत सव्याद्विष्णवे त्वा ॥ य० अ० ५, मं० १९ ॥ इति मन्त्रेण ॥

एवमस्थीनि विन्यसेत्—

इस प्रकार ३६० पत्ता अस्थी के वास्ते लगावै ।

ततः यवपिष्टं न्यसेन्मांसे पुत्तलस्योपरि समन्ताल्लेपनीयम् ॥

इसके बाद जौ का आटा गूंधकर (सान कर) पुत्तल के ऊपर मांस के स्थान में 'युञ्जते मन' इस मन्त्र से लगावे ।

ॐ युञ्जते मनं ऽउत युंञ्जते धियो व्विप्प्रा व्विप्रस्य बृहतो व्विपश्चितं+ ॥ व्वि होत्रा दधे व्वयुनाव्विदेक ऽइन्न्मही देवस्य सवितुः परिष्टुतिः ॥ य० अ० ३७, मं० २ ॥ इति मन्त्रेण ॥

ततः शोणिते मधु विन्यसेत्—

बाद 'मधु व्वाता' इस मन्त्र से शोणित के स्थान में मधु लगावे ।

ॐ मधु व्वाता ऽऋतायते मधुं क्षरन्ति सिन्धवः ॥ माध्वीर्न्नः सन्त्वोषधीः ॥ १ ॥ मधु नक्तमुतोषसो मधुमत्पार्थिवꣳ रजः ॥ मधु द्यौरस्तु नः पिता ॥२॥ मधुमान्नो वनस्पतिर्म्मधुमाँ२ऽअस्तु सूर्यः ॥ माध्वीर्गावो भवन्तु नः ॥ य० अ० १३, मं० २७.२८.२९ ॥ इति मन्त्रेण ॥

नालिकेरं शिरोदेशे—

'शिरो मे श्रीः' इस मन्त्र से शिर के जगह नारियल देवे—

शिरो मे श्रीर्यशो मुखन्त्विषिः केशाश्च श्मश्रूणि ॥ राजा मे प्राणो ऽअमृतꣳ सम्म्राट् चक्षुर्व्विराट् श्रोत्रम् ॥ य. अ. २० मं. ५ ॥ इति मन्त्रेण ॥

तुम्ब दद्याच्च तालुके—

'कया नश्चित्र' इस मन्त्र से तालू के जगह तूम्बी देवे—

कया नश्चित्र ऽआभुवदूती सदावृधः सखा । कया शचिष्ठयाऽवृता ॥ य० अ० २७, मं० ३९ ॥ इति मन्त्रेण ॥

पञ्चरत्नं मुखे दद्यात्—

'हिरण्यञ्च मे' इस मन्त्र से मुँह में पञ्चरत्न देवे—

ॐ हिरंण्यञ्च मेऽयंश्च मे श्यामञ्चं मे लोहञ्चं मे सीसंञ्च मे त्रपुं च मे यज्ञेनं कल्पन्ताम् ॥ य० अ० १८, मं० १३ ॥ अस्मा च मे–इत्यस्योत्तरार्द्धरूपः ॥ इति मन्त्रेण ॥

जिह्वायां कदलीफलम्–

'वरुणस्योत्तम्भनमसि' इस मन्त्र से जिह्वा के जगह केला देवे।

ॐ व्वरुंणस्योत्तम्भंनमसि व्वरुंणस्य स्कम्भसर्ज्जनी स्थो व्वरुंणस्य ऽऋतसदंन्यसि वरुंणस्य ऽऋतसदंनमसि व्वरुंणस्य ऽऋतसदंनमासीद ॥ य० अ० ४, मं० ३६ ॥ इति मन्त्रेण ॥

अंत्रेषु नालिकाशाकम्–

'अग्निजिह्वा मनवः' इस मन्त्र से अँतड़ियों में करेमू की नली (डंडी) देवे–

अग्निजिह्वा मनंवः सूरंचक्षसो विश्वें नो देवा ऽअवसा गंमन्निह ॥ य० अ० २५, मं० २० उत्तरार्द्धम् ॥ इति मन्त्रेण ॥

बालुकं घ्राणके न्यसेत्–

'प्राणाय स्वाहा' इस मन्त्र से घ्राण में बालू देवे।

ॐ प्राणाय स्वाहा अऽपानाय स्वाहा व्यानाय स्वाहा ॥ अम्बे ऽअम्बिकेऽअम्बालिके न मा नयति कश्चन ॥ ससंस्त्यश्वकः सुभद्रिकाङ्काम्पीलवासिनीम् ॥ य० अ० २३ मं० १८ ॥ इति मन्त्रेण ॥

वसायां मृत्तिकां दद्यात्—

'अद्भ्यः संभृतः' इस मन्त्र से हथिनी के स्थान की मिट्टी बाँक्षा में देवे।

ॐ अद्भ्यः सम्भृतः पृथिव्यै रसाच्च विश्वकर्म्मणः समवर्त्तताग्ग्रे ॥ तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्त्यस्य देवत्वमाजानमग्ग्रे ॥ य० अ० ३१ मं० १७ ॥ इति मन्त्रेण ॥

गोमूत्रं मूत्रके न्यसेत्—

'समुद्रादूर्मि' इस मन्त्र से मूत्र के स्थान में गोमूत्र देवे।

ॐ समुद्रादूर्म्मिर्म्मधुमाँ२॥ ऽउदारदुपाᳬशुना सममृतत्वमानट् ॥ घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः ॥ य० अ० १७ मं० ८९ ॥ इति मन्त्रेण ॥

विन्यसेद्गन्धकं धातौ—

'पञ्च नद्यः' इस मन्त्र से धातु के स्थान में गन्धक देवे।

ॐ पञ्च नद्यः सरस्वतीमपियन्ति सस्रोतसः ॥ सरस्वती तु पञ्चधा सो देशेऽभवत्सरित् ॥ य० अ० ३४ मं० ११ ॥ इति मन्त्रेण ॥

मेदसि मनशिलस्तथा—

'गोमदूषु णा' इस मन्त्र से मेदा में मैनसिल देवे।

ॐ गोमदूषु णासत्याश्श्वावद्यातमश्विना ॥ वर्त्ती रुद्रा नृपाय्यम् ॥ य० अ० २०, मं० ८१ ॥ इति मन्त्रेण ॥

पुरीषे पित्तलं दद्यात्—

'नमः कपर्दिने' इस मन्त्र से दिशा के स्थान पीना (चावल का आटा हरदी मिला के) देवे।

ॐ नमः कपर्दिने च व्युप्तकेशाय च नमः सहस्राक्षाय च शतधन्वने च नमो गिरिशयाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते च ॥ य० अ० १६ मं० २९ ॥ इति मन्त्रेण ॥

दद्याद्रेतसि पारदम्—

'विष्णोर्नुकं' इस मन्त्र से वीर्य के स्थान में पारा देवे।

ॐ विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि

व्विमुमे रजाᳫंसि ॥ यो ऽअस्कंभायदुत्तरᳫं सधस्थं व्विचक्रमाणस्त्रेधोरुगायो व्विष्णवे त्वा ॥ य० अ० ५ मं० १८ ॥ इति मन्त्रेण ॥

अधरे विद्रुमं दद्यात्—

'वित्तश्च मे' इस मन्त्र से दोनों ओष्ठ में मूंगा देवे।

ॐ व्वित्तञ्च मे व्वेद्यं च मे भूतञ्च मे भाविष्यच्च मे सुगञ्च मे सुपथ्यञ्च म ऽऋद्धं च म ऽऋद्धिश्च मे क्लृप्तञ्च मे क्लृप्तिश्च मे मतिश्च मे सुमतिश्च मे यज्ञेन कल्पन्ताम् ॥ य० अ० १८ मं० ११ ॥ इति मन्त्रेण ॥

तिलकल्कं च सन्धिषु—

'शन्नो देवी' इस मन्त्र से संधियों में तिल्ली की खरी देवे।

ॐ शन्नो देवीरभिष्टय ऽआपो भवन्तु पीतये ॥ शं योरभिस्रवन्तु नः ॥ य० अ० ३६ मं० १२ ॥ इति मन्त्रेण ॥

दद्याद्वटजटां केशे—

'पूषा नो यथा वेद' इस मन्त्र से बाल के स्थान में बड़ की जटा लगावै।

ॐ पूषा नो यथा व्वेदसामसद्वृधे रक्षिता

पायुरदब्धः स्वस्तये ॥ य० अ० २५ मं० १८ ॥

तमीशानमित्यस्योत्तरार्द्धरूपः ॥ इति मन्त्रेण ॥

कर्णयोस्तालपत्रं च—

'नमोऽस्तु रुद्रेभ्यो' इस मन्त्र से दोनों कान के स्थान में बेजपत्ता देवे।

ॐ नमोऽस्तु रुद्रेभ्यो येऽन्तरिक्षे येषां व्वात ऽइषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमो ऽअस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यन्द्विष्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दध्मः ॥ य० अ० १६ मं० ६५ ॥ इति मन्त्रेण ॥

नासाया शतपत्रकम्—

'प्राणदा अपानदा' इस मन्त्र से नाक के स्थान में कमल देवे।

ॐ प्राणदा ऽअपानदा व्यानदा वर्च्चोदा वरिवोदाः ॥ अन्न्याँस्ते ऽअस्मत्तपन्तु हेतयः पावको ऽअस्मभ्यꣳ शिवो भव ॥ य० अ० १७ मं० १५ ॥ इति मन्त्रेण ॥

कूर्चे च सौकराः केशाः—

'शिरो मे श्रीः' इस मन्त्र से दाढ़ी, मूँछ भौंह इत्यादि में सूअर का बाल देवे।

ॐ शिरो॑ मे॒ श्रीर्य्यश॒ो मुख॒न्त्विषि॒ः केशा॑श्च॒ श्म्म- श्रू॑णि ॥ राजा॑ मे प्रा॒णो ऽअ॒मृत॑ᳪ सम्म्राट् चक्षु॒र्व्वि॒राट् श्श्रोत्र॑म् ॥ य० अ० २० मं० ५ ॥ इति मन्त्रेण ॥

ऊर्णां च गुह्यवक्षसोः-प्रथमतः वक्षसि—

'विष्णो रराट' इस मन्त्र से छाती में भेड़ी का बाल देवे।

ॐ व्विष्णो॑ र॒राट॑मसि॒ व्विष्णो॒ः श्श्नप्त्रे॑ स्त्थो॒ व्विष्णो॒ः स्यूर॑सि॒ व्विष्णो॑र्ध्रु॒वो॒ऽसि ॥ व्वै॒ष्ण॒वम॑सि॒ विष्ण॑वे त्वा ॥ य० अ० ५ मं० २१ ॥ इति मन्त्रेण ॥

गुह्ये च ऊर्णां दद्यात्—

'तदस्तु मित्रा' इस मन्त्र से गुदा इत्यादि में भेड़ी का बाल देवे।

ॐ तदस्तु मित्रावरुणा तदग्ने शं योरस्मभ्यमि- दमस्तु शस्तम् ॥ अशीमहि्गाधमुत प्रतिष्ठान्नमो दिवे बृहते सादनाय ॥ ऋक् ॥ इति मन्त्रेण ॥

सुवर्णं हृदये दद्यात्—

'हिरण्यगर्भः' इस मन्त्र से हृदय में सोना देवे।

ॐ हि॒र॒ण्य॒ग॒र्भः सम॑वर्त्त॒ताग्रे॑ भू॒तस्य॑ जा॒तः पति॒रेक॑ ऽआसीत् ॥ स दा॑धार पृ॒थि॒वीं द्यामु॒ते-

माङ्कस्मै देवाय हुविषा विधेम ॥ य० अ० १३ मं० ४ ॥ इति मन्त्रेण ॥

गुञ्जे च स्तनयोर्न्यसेत्—

'दीर्घायुत्वाय बलाय' इस मन्त्र से दोनों छाती पर घुँघुची देवे।

ॐ दीर्घायुत्वाय बलाय वर्चसे सुप्रजास्त्वाय सहसा अथो जीव शरदः शतम् ॥ इति मन्त्रेण ॥

चक्षुषोः कपर्द्दिके दद्यात्—

'तच्चक्षुर्देवहितं' इस मन्त्र से दोनों आँख के स्थान में दो कौड़ी देवे।

ॐ तच्चक्षुर्देवहितम्पुरस्ताच्छुक्रमुच्चरत् ॥ पश्येम शरदः शतञ्जीवेम शरदः शतꣳ शृणुयाम शरदः शतम्प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतम्भूयश्च शरदः शतात् ॥ य० अ० ३६ मं० २४. इति मन्त्रेण ॥

सिन्दूरं नेत्रकोणयोः—

'अग्निर्ज्योति' इस मन्त्र से दोनों आँख के कोनों में सिन्दूर देवे।

ॐ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्यो ज्योतिर्ज्योतिः सूर्य्यः स्वाहा। अग्निर्वर्च्चो ज्ज्यो-

तिर्व्वर्च्चः स्वाहा सूर्य्यो व्वर्च्चो ज्ज्योतिर्व्वर्च्चः स्वाहा। ज्ज्योतिः सूर्य्यः सूर्य्यो ज्ज्योतिः स्वाहा॥ य० अ० ३ मं० ९॥ इति मन्त्रेण॥

ऋद्धिवृद्धी भुजद्वन्द्वे—

'सत्रस्य ऋद्धिरस्य' इस मन्त्र से दोनों बाहुओं में ऋद्धि वृद्धि औषधी देवे।

सत्रस्य ऽऋद्धिरस्यगंन्म ज्ज्योतिरमृता ऽअभूम॥ दिवंम्पृथिव्व्या अद्ध्यारुहामाविदाम देवान्त्स्वज्ज्योतिः॥ य०अ० ८ मं० ५२॥ इति मन्त्रेण॥

कमलं नाभिमण्डले—

'नाभिर्मे चित्तं' इस मन्त्र से नाभि में कमल देवे।

नाभिर्म्मे चित्तं विज्ञानम्पायुर्म्मेऽपचितिर्भसत्॥ आनन्दनन्दावाण्डौ मे भगः सौभाग्यम्पसः॥ जङ्घाभ्याम्पद्भ्यान्धर्म्मोऽस्मि विशि राजा प्प्रतिष्ठितः॥ य० अ० २० मं० ९॥ इति मन्त्रेण॥

घृतं नाभ्यां प्रदेयं स्यात्—

'घृतं घृतपावान' इस मन्त्र से नाभि में घी देवे।

ॐ घृतं घृतपावानः पिबत व्वसां वसापावानः

पिबतान्तरिक्षस्य हुविरसि स्वाहा ॥ दिशः प्रदिश ऽआदिशो विदिशं ऽउद्दिशो दिग्भ्यः स्वाहा ॥ य० अ० ६ मं० १९ ॥ इति मन्त्रेण ॥

वृन्ताकौ वृषणद्वये—

'त्र्यम्बकं यजामहे' इस मन्त्र से दोनों वृषण के स्थान में भण्टा देवे।

ॐ त्र्यंम्बकं यजामहे सुगन्धिम्पतिवर्द्धनम् ॥ उर्व्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥ य० अ० ३ मं० ६० ॥ इति मन्त्रेण ॥

शिश्ने च गर्ज्जरं दद्यात्—

'औपस्थ्य मन्यव' इस मन्त्र से लिङ्ग में गाजर देवे।

ॐ औपस्थ्य मन्यवप्रसीति मेधां देवीमेधां तु षट् ऋषय नमौपस्थ्यमन्यवे त्वा ॥ इति मन्त्रेण ॥

उदरे च त्रपु स्मृतम्—

'वाजे वाजे' इस मन्त्र से पेट में सीसा या राँगा देवे।

ॐ वाजेवाजेऽवत व्वाजिनो नो धनेषु विप्प्रा ऽअमृता ऋतज्ञाः ॥ अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः ॥ य० अ० ९ मं० १८ ॥ इति मन्त्रेण ॥

परिधानं पट्टवस्त्रम्—

'येनेन्द्राय' इस मन्त्र से रेशमी वस्त्र देवे।

ॐ येनेन्द्राय बृहस्पतिर्वासः पर्य्यदधादमृतन्तेन त्वा परिदधाम्यायुषे दीर्घायुत्वाय बलाय वर्चसे ॥ इति मन्त्रेण ॥

कुंकुमैर्मूर्ध्नि लेपनम्—

'द्यौः शान्तिः' इस मन्त्र से मस्तक में कुंकुम लगावे।

ॐ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः ॥ वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥ य. अ. ३६ मं. १७ ॥ इति मन्त्रेण ॥

सर्वौषधियुतं कृत्वा—

'या ओषधी' इस मन्त्र से सर्वौषधी लगावै।

ॐ या ऽओषधीः पूर्वा जाता देवेभ्यस्त्रियुगम्पुरा ॥ मनैनु बभ्रूणामहꣳ शतन्धामानि सप्त च ॥ य० अ० १२ मं० ७५ ॥ इति मन्त्रेण ॥

कर्पूरागुरुधूपैश्च पूजयेत्—

'धूरसि' इस मन्त्र से कपूर, धूप, अगर देवे।

ॐ धूरसि धूर्व्व धूर्व्वन्तन्धूर्व्व तं य्योऽस्मान्धूर्व्वति तन्धूर्व्वयं व्वयन्धूर्व्वामः ॥ देवानामसि व्वह्नितम ᳪ सस्नितमं पप्रितम ञ्जुष्टतमन्देवहूतमम ॥ य० अ० १ मं० ८ ॥ इति मन्त्रेण ॥

शुभ्रैः पुष्पैश्च पूजयेत्—

'या फलिनी' इस मन्त्र से सफेद फूल देवे ।

ॐ याः फलिनीर्य्या ऽअफला ऽअपुष्पा याश्च पुष्पिणीः ॥ बृहस्पतिप्प्रसूतास्ता नो मुञ्चन्त्व ᳪ हसः ॥ य० अ० १२ मं० ८९ ॥ इति मन्त्रेण ॥

ततः पुत्तलमभिषेचयेत्—

'इमम्मे वरुण श्रुधी' इस मन्त्र से पुत्तल को अभिषेक करै ।

ॐ इमम्मे व्वरुण श्रुधी हवमद्या च मृडय ॥ त्वामवस्युराचके ॥ य० अ० २१ मं० १ ॥ इति मन्त्रेण ॥

शालग्रामशिलोदकैः पुत्तलं स्नापयेत्—

'अपवित्रः पवित्रो वा' इस मन्त्र से शालिग्राम की शिला के जल से स्नान करावै ।

ॐ अपवित्रः पवित्रो वा सर्वाऽवस्थां गतो-

ऽपि वा । यः स्मरेत्पुण्डरीकाक्षं स बाह्याऽभ्यन्तरः शुचिः ॥ इति मन्त्रेण ॥

ततः घृतदीपं प्रज्वाल्य पुत्तलहृदि स्थापयेत् । यावद्दीपः प्रज्वलति तावद्विष्णोः स्मरणं कुर्यात् । दीपान्तसमयेऽष्टमहादानानि कुर्यात् ॥

उसके बाद घी का दीया जलाकर पुत्तल के हृदय पर रखै । जब तक दीया जलता रहै तब तक विष्णु का स्मरण करै । दीया बुझाने के समय आठ महादान करै ।

तिलं लोहं हिरण्यं च कार्पासं लवणं तथा ।
सप्तधान्यं क्षितिर्गाव एकैकं पावनं स्मृतम् ॥

इत्यष्टमहादानानि ॥

सो लिखते हैं—तिल १, लोहा २, सोना ३, कपास ४, नोन ५, सप्तधान्य ६, पृथिवी ७, गौ ८ ॥

अथ अष्टमहादानसङ्कल्पः ॥

यह ८ दान सङ्कल्प लिखे हुए से करै ।

हरिः ॐ तत्सदद्य ब्रह्मणोऽह्नि द्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरेऽष्टाविंशतितमे कलियुगे कलिप्रथमचरणे जम्बूद्वीपे भरतखण्डे आर्यावर्तैकदेशे मेरोर्दक्षिणपार्श्वेऽमुकनदीतटेऽमुक-

क्षेत्रेऽमुकायनेऽमुकऋतावमुकराशिस्थिते सूर्येऽमुकमासेऽमुकपक्षेऽमुकतिथावमुकवासरेऽमुकगोत्रस्य पुत्तलस्थस्याऽमुकजीवस्य अक्षयस्वर्गलोकादिफलप्राप्त्यर्थं नाना-सौख्यविवर्द्धनार्थमौर्ध्वदैहिकसम्प्रदानत्वयोग्यतासिद्ध्यर्थम् इमान्यष्टमहादानानि तिलादिगोपर्यन्तानि अमुकगोत्रायाऽमुकवेदाऽध्यायिने यस्मैकस्मैचिद्विष्णुरूपायाऽमुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ॥

ततः तिलपात्रं देयम् ।

उसके बाद तिलपात्र दान करै ।

अद्येत्यादि पठित्वा अमुकगोत्रस्य पुत्तलस्थस्याऽमुकजीवस्य प्रेतत्वोत्तारणार्थं इदं तिलपात्रं यस्मैकस्मैचिद्विष्णुरूपाय ब्राह्मणाय तुभ्यमहं सम्प्रददे ।

ततः विष्णुश्राद्धं कुर्यात् ।

उसके बाद विष्णु श्राद्ध मूल में लिखे हुए क्रम से करे ।

आचम्य प्राणानायम्य देशकालौ संकीर्त्य अमुकगोत्रस्य पुत्तलस्थस्याऽमुकजीवस्य षट्त्रिंशद्दुर्म्मरणमध्ये शरीरकृन्महापातकादग्धदेहोत्पन्नदोषपरिहा-

रार्थं वाङ्मनःकायकृतानां पापानां विशोधनार्थं पुत्त-
लस्थस्य जीवस्य मरणावसरे सर्वतीर्थानां स्नान-
पुण्यफलप्राप्त्यर्थं विष्णुश्राद्धमहं करिष्ये ॥ इति-
संकल्पः ॥

ततः दिग्बन्धनम् ॥

पूर्वे तु पुण्डरीकाक्ष आग्नेय्यां मधुसूदनः ।
दक्षिणस्यां तु वाराहो नैर्ऋत्यां च गदाधरः ॥१॥
पुरुषोत्तमस्तु वारुण्यां वायव्यां पीतवासभृत् ।
दामोदरस्तु कौबेर्यां हरिरीशान एव च ॥२॥
ऊर्ध्वं रक्षतु विश्वात्मा पाताले यज्ञरक्षकः ।
एवं दश दिशो रक्षेत् केशवः सर्वरक्षकः ॥३॥

ततः विष्णुस्मरणम् ।

श्राद्धारम्भे गयां ध्यात्वा ध्यात्वा देवं गदाधरम् ।
मनसा च पितॄन् ध्यात्वा ततः श्राद्धं समारभेत् ॥

विष्णुश्राद्धोपहाराणां सर्वेषां पवित्रताऽस्तु ॥सव्यम्॥
पूर्वाभिमुख उपविश्य ॥ ॐ पापहन्त्रे विष्णवे एतत्ते
पाद्यं पादावनेजनं पादप्रक्षालनं स्वाहा ॥ एवमेव
अर्घ्यम् ॥ आचमनम् ॥ स्नानम् ॥ गन्धम् ॥ पुष्पम् ॥

इदमन्नोदकम् ॥ धूपम् ॥ दीपम् ॥ नमस्कारः ॥ अस्य पुण्याचरणाङ्गविष्णुश्राद्धस्याऽर्चनविधेः पूर्णताऽस्तु ॥ यथादास्यमानं सम्पन्नं ब्राह्मणभोजनं प्रीयतां वः स्वाहा ॥ दास्यमानां दक्षिणां पापहन्त्रे विष्णवे स्वाहा ॥ इति विष्णुश्राद्धम् ॥

दीपान्ते पुत्तलस्य स्नपनादि कुर्यात्। ततः पुत्रेण वपनं कार्य्यम् ॥ पुत्तलस्य च्छादनं कृत्वा षट् पिण्डान् विधाय क्रमेण दद्यात्।

जब दीप बुझ जाय, तब पुत्तल को स्नान करावे। पुत्र क्षौर बनवावै। स्नान करके नवीन दो वस्त्र धारण करके पुत्तल को भी वस्त्र में ढँक कर मूल में लिखे हुए सङ्कल्पों से ६ पिण्ड क्रम से सब स्थानों में देवे।

अथ षट् पिण्डदानविधिः।

अपसव्यम्। मृतस्थाने शवो नाम द्वारे पांथः प्रकीर्तितः। चत्वरे खेचरो नाम विश्रामे भूतसंज्ञकः ॥ १ ॥ चितायां साधको नाम, अस्थिसञ्चयने च षट् ॥

ॐ अद्येत्यादि० अमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वोत्तारणार्थं दुर्गतिविनाशनार्थं मृत्युस्थाने शवो

नाम, क्रान्तोत्क्रान्तमृत्युस्थानश्राद्धनिमित्तं एष पिंण्ड-स्ते मया दीयते तवोपतिष्ठताम् ॥ १ ॥ अद्येत्यादि पठित्वा। असद्गतिविनाशनार्थं द्वारदेशे पान्थो नाम, क्रान्तोत्क्रान्तद्वारश्राद्धनिमित्तं एष पिण्डस्ते मया दीयते तवोपतिष्ठताम् ॥२॥ अद्येत्यादि पठित्वा चत्वरे खेचरो नाम, क्रान्तोत्क्रान्तचत्वरश्राद्धनिमित्तं एष पिण्डस्ते मया दीयते तवोपतिष्ठताम् ॥ ३ ॥ ॐ अद्येत्यादि विश्रामे भूतसंज्ञको नाम, क्रान्तोत्क्रान्त-विश्रामश्राद्धनिमित्तं एष पिण्डस्ते मया दीयते तवोपतिष्ठताम् ॥ ४ ॥ ॐ अद्येत्यादि चितायां साधको नाम, क्रान्तोत्क्रान्तचिताश्राद्धनिमित्तं एष पिण्डस्ते मया दीयते तवोपतिष्ठताम् ॥

ततोऽदग्धायां भूमौ दर्भैः परिसमुह्य गोमयोदकेनोपलिप्य त्रिरुल्लिख्य मृदमुद्धृत्य कुशोदकेनाभ्युक्ष्य एतान् पञ्चभूसंस्कारान् विधायाऽग्निं स्थापयेत् ॥ ततः समिधादानम् ॥

उसके बाद दग्धवाली पृथिवी पर मूल में लिखे हुए पञ्च भू संस्कार करके अग्निस्थापन करै। उसके बाद समिधा लेकर

अग्नि में छोड़े और मूल में लिखे हुए मन्त्र से घी की ४ आहुति देवे ।

ॐ प्रजापतये स्वाहा ॥ इदम० ॥

ॐ इन्द्राय स्वाहा ॥ इदमि० ॥

ॐ अग्नये स्वाहा ॥ इदं० ॥

ॐ सोमाय स्वाहा ॥ इदं० ॥

चितायां क्रव्यादनाम्ने वैश्वानराय इदमासनं० एवमेव इदमन्नोदकं० चन्दनं० पुष्पं च० ततः चितास्थस्य शवस्य मुखे आज्याहुतयो देयाः ॥ यमाय चान्तकायेति मृत्यवे ब्रह्मणे तथा, इति ॥ ततः क्रव्यादसंज्ञाग्निं सम्पूज्याऽग्निमुद्दीपयेत् ।

वह अग्नि चिता पर क्रव्याद नाम करके देवे। अन्न जल चन्दन पुष्प देवे, उसके बाद चिता पर स्थापित शव के मुख में घी की आहुति यम को, अन्तक को, मृत्यु को, ब्रह्मा को इस नाम से देवे। उसके बाद क्रव्याद नाम अग्नि को पुष्प, अक्षत से पूजन करके मूल में लिखे हुए मन्त्र से अग्नि जलावे—

ॐ त्वं भूतकृज्जगद्योने त्वं भूतपरिपालकः ।

भूतसंहारकस्तस्मादेनं स्वर्गं मृतं नय ॥१॥

कृत्वा सुदुष्कृतं कर्म जानता वाऽप्यजानता ।

मृत्युकाले च संप्राप्ते नरं पञ्चत्वमागतम् ॥२॥

धर्माऽधर्मसमायुक्तं लोभमोहसमावृतम् ।

दहेयं सर्वगात्राणि दिव्याँल्लोकान् स गच्छतु ॥३॥

एवं मन्त्रं समुच्चार्य शिर आरभ्य प्रदक्षिणक्रमेण शिरःपर्यन्तमग्निं दद्यात् ॥ ततोऽर्द्धदग्धे देहे सति तिलमिश्रां समंत्रामाहुतिं दद्यात् ॥ अस्मात्त्वमधि जातोऽसि त्वदुयञ्जायतम्पुनः ॥ असौ स्वर्गाय लोकाय स्वाहा ज्वलतु पावकः ॥ य० अ० ३५ ॥ मं० २२ ॥ इति मन्त्रेण ॥

ततो गाढं रोदितव्यं तेन तस्य सुखं भवेत् । एवमग्निदाहं कुर्यात् ॥

उसके बाद खूब रोवै, उससे प्रेत सुखी होता है। इस प्रकार अग्निदाह करना।

ततोऽस्थिसञ्चयनश्राद्धं कुर्यात् ।

उसके बाद अस्थिसञ्चयन श्राद्ध मूल में लिखे हुए सङ्कल्प के सहित करै।

अपसव्यम्। ॐ अद्येत्यादि पठित्वा॥ दक्षिणाभिमुखः, मोटक-तिल-जलान्यादाय अमुकगोत्रस्या-

ऽमुकप्रेतस्य प्रेतत्वोत्तारणार्थमसद्गतिविनाशनार्थमस्थि-सञ्चयन-तच्छकश्राद्धमहं करिष्ये ॥ अद्याऽमुकगोत्र-स्याऽमुकप्रेतस्य तच्छकश्राद्धनिमित्तं एष पिण्डस्ते० ॥ अनेन अस्थिसञ्चयनतच्छकश्राद्धविधेः सम्पूर्णताऽस्तु॥ अनेनाऽस्थिसञ्चयनतच्छकश्राद्धकर्मणा कृतेन दशाह-श्राद्धयोग्यताप्राप्तिरस्तु ॥

इति श्रीवायुनन्दनमिश्रविरचितहिन्दीटीकायुता

पुत्तलविधानपद्धतिः समाप्ता ।

———

अथ पुत्तलविधान-सामग्री

मृगचर्म	तिलों की खल	कुङ्कुम (केसर)
पलाशवृन्त ३६०	शहद	सर्वौषधी
कुश	बड़ की जटा	कपूर
जौ मिला हुआ २५ सेर	ताडपत्र	चन्दन श्वेत
श्रीफल	शतपत्र (कमल)	पुष्प श्वेत
तूंबा	तिलपुष्प	ताम्रपात्र
पञ्चरत्न	ऊन	शालग्राम
कदलीफल	सुवर्ण	सुपारी
सरनाली	गुञ्जा (घुंघुची)	उशीर (खस)
नदी का रेत	सिन्दूर	ऋद्धि
तुलसी की मिट्टी	कपर्दिका (कौड़ी)	वृद्धि
गोमूत्र	कमलपुष्प	घृतदीप
गन्धक	कमोदनी	रेशमी वस्त्र
हरिताल	घृत १॥ सेर	अष्ट महादान
मनशिल	वृन्ताक (भण्टा)	तिलपात्र
पित्तल	गर्जर (गाजर)	वैतरणी
पारा	त्रपु (राँगा-सीसा)	यज्ञोपवीत
मूंगा	वटपत्र	सराई
		सूअर के बाल

* इति पुत्तलविधानसामग्री समाप्ता *

स्व० पं० श्रीवायुनन्दनमिश्रविरचितग्रन्थरत्नानि

अर्कीविवाहपद्धतिः—	=)
उपनयनपद्धतिः—मूलमात्रम्	॥=)
कुण्डमण्डपसिद्धिः—भाषाटीका	॥)
कुम्भविवाहः—	=)
गयाश्राद्धपद्धतिः—मूलमात्रम्	।=)
ग्रहप्रयोगः अर्थात् ग्रहशान्तिः—	२॥)
पञ्चदानपद्धतिः—मूलमात्रम्	।=)
पञ्चाङ्गपद्धतिः— ,,	।=)
पुराणोक्तविवाहपद्धतिः—	।–)
प्रतिष्ठामहोदधिः—	५)
प्रेतमञ्जरी—भाषाटीका सहिता	२।)
मूलशान्तिपद्धतिः—मूलमात्रम्	।≡)
रुद्रयागपद्धतिः— ,,	२॥)
वास्तुशान्तिप्रयोगः— ,,	॥=)
वासिष्ठीहवनपद्धतिः— ,,	॥=)
विवाहपद्धतिः— ,,	॥=)
विष्णुयागपद्धति—	२)
शिलान्यास-देहलीन्यासपद्धतिः—	।)
शूद्रपार्वणैकोद्दिष्टश्राद्धपद्धतिः—	≡)
श्राद्धसंग्रहः अर्थात् नूतनश्राद्धविवेकः—	६)

सर्वविधकर्मकाण्डपुस्तकप्राप्तिस्थानम्—

मास्टर खेलाड़ीलाल ऐण्ड सन्स,

संस्कृत-बुकडिपो,

कचौड़ीगली, बनारस सिटी ।